अथवा-हे भगवन् तपाईंको जुन कैवल्यपदहो, जो दृढयोगीहरू बडो मुस्कीलले प्राप्त गर्छन्, त्यो त तपाईंकै शत्रुहरूले झगडाले तपाईंलाई सम्झदामात्र पनि पाए, यसकारण कैवल्य त्यति दुर्लभ छैन, तपाईंको चरणमा रमाउन पाउनु नै बडो दुर्लभ छ । यसैले त हामी श्रुतिहरू ब्रह्मोपासनालाई पनि लत्याएर तपाईंका चरणमा रमाउनैको निमित्त आफूलाई भोग्य बनाएर गोकुलमा गोपिका रूपले जन्मिएका हौं ।

सुखदार्थ—भगवन् ! मुनयो यदाप्नुवन्ति ।

स्मरणात्ते, तवशत्रवो यदापुः ॥

रतिकामनया तदेव गोप्यः ।

भवतात्तच्च सदैव न स्त्वमाप्यः ॥१०॥

मनस्तलनिरोधले मुनिहरू जहाँ पुग्दछन्,

तिमीसित विरोधले रिपुहरू त्यहीँ पुग्दछन् ॥

कृपामय तिमी कृपागर समानदर्शी विभो !

त्वदीयचरणाब्जको भजन गर्दछौं है प्रभो! ॥१०॥

॥१०॥

मूल श्लोक—

क इह नु वेदवताऽवरजन्मलयोऽग्रसरं,

यतउदगादृषिर्यमनु देवगणाउभये ॥

तर्हिनसन्नचाऽसदुभयं नचकालजबः,

किमपि न तत्र शास्त्र मवकृष्य शयीत यदा ॥११॥

पदच्छेदार्थ—कः, इह, नु, वेद, वत, अवरजन्मलयः, अग्रसरम्, यतः, उदगात्, ऋषिः, यम्, नु, देवगणाः, उभये, तर्हि, न, सत्, नच, असत्, उभयम्, न, च, कालजबः, किमपि, न, तत्र, शास्त्रम्, अवकृष्य, शयीत, यदा ॥११॥

अन्वयार्थ—यतः, ऋषिः, उदगात्, यम्, अनु, उभये, अग्रसरम्, इह, अवरजन्मलयः, कः, नुः, वत, वेद, यदा, अवकृष्य, शयीत, तर्हि, सत्, न, असत्, च, न, उभयम्, न, कालजबः, च, न, शास्त्रम्, न, किमपि, तत्र, न ।

पर्यायार्थ—यतो भवतः सृष्ट्यादौ सर्वप्रथम मृषि र्ब्रह्मा वा वेद उदगादुत्पन्नः । यं ब्रह्माण मनु पश्चादुभये प्रवृत्तिनिष्ठा मरीच्यादयो निवृत्तिनिष्ठाः सनकादयश्चद्विविधा देवगणा उत्पन्ना इत्यर्थः । अग्रसरं पूर्वत एव वर्तमानं त्वा मिह तत्पश्चादुत्पन्ने जगत्यवरजन्मलय आधुनिक जन्ममरणशीलो जीवः कः को नामा नु निश्चयं वताश्चर्यं वेद जानाति नकोपि जानातीत्यर्थः । यदा प्रलयेऽवकृष्य समस्तप्रपञ्चमुपसंहृत्य शयीत भवानशेत तर्हितदा सत्स्थूलमाकाशादि न नह्यासीत् । असत्सूक्ष्मं महदादि च न नह्यासीत् । उभयं सदसदात्मकं वा सदसद्भ्यामारब्धंशरीरं न नह्यासीत् । कालजबः कालचेष्ट्य च न नह्यासीत् । शास्त्रं ज्ञापकं वेदादिशास्त्रं न नह्यासीत् । किमपि किञ्चिदपि तत्र तदा सृष्टेः प्रलयावसरे न नह्यासीत् । अत स्त्वां न कोऽपि वेदेत्यर्थः ।

अत्र च श्रुतिस्मृत्यादयः प्रमाणम् – **"यस्यामतं तस्यमतं मतं यस्य न वेद सः, अविज्ञातं विजानतां विज्ञातमविजानताम् ॥" "यद् वाचा नभ्युदितं येनवागभ्युद्यते", यन्मनसा न मनुते येनाहुर्मनो मतम्" यच्चक्षुषान पश्यति येन चक्षूंषि पश्यति "यच्छ्रोत्रेण न श्रृणोतियेन श्रोत्रमिदं श्रुतम्" "यत्प्राणेन न प्राणिति येन प्राणःप्रणीयते" "न तत्र सूर्योभाति न चन्द्र तारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः" न तद्भासयते सूर्यो नशशाङ्को न पावकः" "सवेत्तिवेद्यं न च तस्याऽस्ति वेत्ता तमाहु रग्र्यं पुरुषं महान्तम्" य एकोवर्णो बहुधाशक्तियोगाद् वर्णाननेकान्निहितार्थो दधाति । विचैति चान्ते विश्वमादौ स देव : स नो बुध्द्या शुभया संयुनक्तु" "येनेदं सर्वं विजानाति तं केन विजानीयात्" ।**

भावार्थ—हे भगवन् ! भवत एव सृष्ट्यादौ सर्वपूर्वं वेदो वा ब्रह्मा प्रादुरभूत्, तत्पश्चान्निवृत्तिनिष्ठाःसनकादयः प्रवृत्तिनिष्ठा मरीच्यादयो द्विविधा देवगणा उदभूवन् । ततःपश्चादेव मनुष्यादयो जाताः । यथाहिपितुरुत्पत्तिं पुत्रो न जानाति तथैव ब्रह्मादिसर्वजगत्कारणं सृष्टिपूर्वमेवसिद्धं त्वां न ब्रह्माऽपिज्ञातुं शक्नोति, जन्ममरणभागी बराकोऽयमाधुनिको मानवः कथं जानीयात्, अपितु न कोऽपि

जानाति । यदा च भवान् प्रलये सर्वंप्रपञ्चजातं स्वस्मिन्नुपसंहृत्याऽशेत, तदा न स्थूलपदार्था आकाशादयः, न सूक्ष्मपदार्था महदादयःआसन्, न च सदसदात्मकं शरीरं, न गुणक्षोभकः कालः, न च ज्ञापकं शास्त्रमासीत् । किंबहुना तदेन्द्रियप्राणबुद्धयादीनां तथा ज्ञापकशास्त्रादीना मप्यभावाज्ज्ञानाऽसम्भवे न किमप्यासीत् तथा न कोऽपि जानातीत्यर्थः ।

तात्पर्यार्थ—सृष्टिकाले देहाद्युपाधिजनितव्यवधाना त्प्रलयकाले साधनाभावान्न केनाऽपि ज्ञायसे त्वमिति कथनमुखेन भगवतोऽनिर्वचनीयत्वं साधितम् ।

सरलार्थ—हे भगवन् ! सृष्टिकालमा सर्वप्रथम तपाईंबाट वेद र ब्रह्मा उत्पन्न भए, त्यसपछि निवृत्तिमार्गनिष्ठ सनकादि र प्रवृत्तिमार्गनिष्ठ मरीच्यादि यी दुई किसिमका देवगणहरू उत्पन्न भए, त्यसपछि मात्र जागतिक प्रपञ्च उत्पन्न भयो । जस्तै छोराले बाबुको उत्पत्ति जान्दैन, त्यस्तै सदासिद्ध सर्वकारणरूप तपाईंलाई तपाईंबाटै उत्पन्न जन्ममरणशील प्राणी को जान्न सक्दछ, अपितु कोही पनि जान्न सक्दैन । प्रलयकालमा जब तपाईं सम्पूर्ण प्रपञ्चलाई आँफैमा समेटेर सुत्नुहुन्छ, त्यसबेला न त आकाशादि स्थूल पदार्थ हुन्छन्, न महदादिसूक्ष्म पदार्थ हुन्छन्, नत यी दुवै तत्त्वबाट बनेको चीज नै रहन्छ, न भाग लगाउने काल नै हुन्छ, न ज्ञान गराउने शास्त्र नै हुन्छ, धेरैं के भनौं केही पनि हुँदैन। जब ज्ञाता, ज्ञेय, ज्ञान त्रिपुटी नै हुँदैन त तपाईंलाई जान्ने भन्ने कुरै आउँदैन । सृष्टिकालमा देहादि उपाधिजनित व्यवधानले गर्दा तपाईंलाई जान्न सकिँदैन, प्रलयकालमा जान्ने साधनको अभावले तपाईंलाई जान्न सकिदैन यसकारण तपाईं अनिर्वचनीय हुनुहुन्छ ।

सुखदार्थ—भगवन् ! जगदग्रिम स्त्वमेकः,
विलये वै जगत स्त्वमेकशेषः ।
गदितुं क्षमते न कोऽपि चेद्वक्,
त्वमतो निर्वचनीयरूपमात्रः ॥११॥

थिएन "अधिसृष्टिको" विधि, जगत् तथा वेद नै,
प्रवृत्ति र निवृत्ति यी पछि बने तिमीबाट नै ॥
रहन्न लयमा कुनै पनि विभो! यसैले यहाँ,
सकुन् विधि र वेद पो कथन गर्न तिम्रो कहाँ ? ॥११॥

॥११॥

जनिमसतः सतोमृतिमुतात्मनि ये चभिदां,
विपणमृतँस्मरन्त्युपदिशन्ति त आरुपितैः ॥
त्रिगुणमयः पुमानितिभिदा यदबोधकृता,
त्वयि न ततः परत्र स भवेदवबोधरसे ॥१२॥

पदच्छेदार्थ—जनिम्, असतः, सतः, मृतिम्, उत, आत्मनि, ये, च, भिदाम्, विपणम् ऋतम्, स्मरन्ति, उपदिशन्ति, ते, आरुपितैः, त्रिगुणमयः, पुमान्, इति, भिदा, यत्, अबोधकृता, त्वयि, न, ततः, परत्र, सः, भवेत्, अवबोधरसे ॥१२॥

अन्वयार्थ—असत उत्पत्तेः प्रागविद्यमानाद्वस्तुतः प्रागभावादित्यर्थः, जनिमुत्पत्तिं स्मरन्ति काणादा नवीनतार्किका वैशेषिका इत्यर्थः। तथैवाऽसत उत्पत्तेः प्रागविद्यमानस्य वस्तुनो जीवेऽविद्यमानस्य ब्रह्मभावस्योत्पत्तिं जनिं योगादिद्वारा स्मरन्ति पातञ्जलाइत्यर्थः। सतः सत्यस्य दुःखस्य मृतिं ज्ञानान्नाशं स्मरन्ति नैयायिका इत्यर्थः। उताऽपि च ये सांख्या आत्मनि भिदां भेदं स्मरन्ति। ये च विपणं कर्मफलमृतं सत्यं स्मरन्ति मीमांसका इत्यर्थः। ते सर्वे मतवादिन आरुपितै र्भ्रमै रुपदिशन्ति शिक्षयन्ति नतु तत्त्वदृष्ट्येत्यर्थः। त्रिगुणमयः सगुणः पुमाञ्जीव इति हेतुना भिदा पूर्वोक्तमतभेदो यद्यस्मादबोधकृताऽज्ञानजनिता वा ऽविद्याशक्तिकल्पिता न स्वरूपत इत्यर्थः । तत अविद्यायाः परत्र परेऽवबोधरसे ज्ञानमये त्वयि ब्रह्मणि सोऽबोधोऽविद्या नभवेन्न प्रभवेत्।

(क) **वैशेषिका : खलु "कार्यमात्रस्योत्पत्तिपूर्वं, प्रागभावो भवति, प्रागभावएवकार्ये निमित्तकारणं भवति, एवं चोत्पन्ने कार्ये प्रागभावनाशो भवति। तथैवोत्पत्तेः प्रागविद्यमानस्य जगतः प्रागभावा दुत्पत्ति"** रिति मन्यन्ते। अत्रच **"सदेव सौम्येदमग्र आसीत्"** इति श्रुतिविरोधा त्तथाऽभावाद् भावोत्पत्ते रसम्भवाद च तथाहि **"नाभावो विद्यते सतः"** इति विरोधाच्च सप्तपदार्थवादिनोऽसद्वादिनः काणदा निरस्ता भवन्ति–इति बोद्धव्यम् ।

(ख) **पातञ्जलाः खलु "जीवेऽसत एव ब्रह्मत्वप्राप्ति र्भवति–यथाहि असुवर्णमपि ताम्रादिकं रसायनप्रभावात्सुवर्णं सम्पद्यते इति मन्यन्ते।"**

अत्र च **"ब्रह्मैव सन् ब्रह्माप्येति"** इति श्रुतिविरोधात्तथा जन्यब्रह्मतत्त्वस्य नश्वरत्त्वाच्च ब्रह्मत्वासत्त्ववादिनो यौगिकाः परास्ताः ।

(ग) **नैयायिकाः** खलु **"एकविंशतिप्रकारकं दुःखं सत्यं वदन्ति, तस्य दुःखसमूहस्य च ज्ञानान्नाशं मन्यन्ते"** । **"एकविंशति प्रकारकं दुःखं च- षडिन्द्रियाणि, षडिन्द्रियविषयाः, षडूर्मयः (बुभुक्षा च पिपासा च प्राणस्य मनस स्तथा, शोकमोहौ शरीरस्य जरामृत्यू षडूर्मयः) शरीरं, सुखं, दुःखं च"**।

अत्र च **"अनीशया शोचति मुह्यमानः"** इतिश्रुते र्दुःखस्याऽज्ञानकल्पितत्वकथनाद् दुःखसत्यत्वविरोधात्तथा **"नाभावो विद्यते सतः"** इति गीतोक्तेः सत्यस्य विनाशाऽभावात्सत्यनाशकथनविरोधाद् दुःखसत्यत्ववादिनो गौतमा : परास्ताः ।

(घ) **सांख्याः** खलु **"जीवानामन्योन्यभेदम्, जीवब्रह्मणोर्भेदम्, जीवजडयोर्भेदम् ब्रह्मजडयोर्भेदम्, जडानां परस्परभेदम्, इति पञ्चधाभेदं "** वदन्ति ।

अत्र च वस्तुत आत्मैक एव । जीवात्मपरमात्मयोः, जीवजीवयोः, जडजीवयोः, ब्रह्मजडयोः, जडजडयो र्यो भेदः स घटाकाश मठाकाशादिवदुपाधिकल्पितः, अतो न वास्तविकः । इत्थमसत्त्वेनाऽभेदा त्तथा **"एको देवः सर्वभूतेषु गूढः" "सर्वं खल्विदं ब्रह्म" "नेह नानास्ति किंचन"** इत्यादि श्रुतिविरोधाच्च भेदवादिनः कापिला निरस्ताः ।

(ङ) **मीमांसकाः** खलु **"अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतंभवति" "इत्यादिश्रुते रर्थवादपरकत्वमजानन्तः कर्मफलं सत्यं परमपुरुषार्थञ्चेति"** मन्यन्ते-

अत्रच **"तद्यथेह कर्मचितो लोकः क्षीयते, एवमेवाऽमुत्रपुण्यचितो लोकः क्षीयते"** इत्यादिश्रुत्या कर्मफलस्य नाशाङ्गीकारात्कर्मफलसत्यवादिनो मीमांसका निरस्ताः ।

इत्थं प्रकारेण काणादपातञ्जलगौतमीयकापिलजैमिनीयानां मतं श्रुतियुक्तिविरुद्धं प्रदश्र्य तन्मतसंगतिरहितत्वे कारणं विवेचयन्त्यः श्रुतयो वेदान्तमतं समर्थयन्ति यथा—

(क) **यदा जीव स्त्रिगुणमयः** स्यात्तदा गुणपरिणामरूपादृष्टवशादेवाऽसतोऽप्युत्पत्ति रिति काणादमतमपि सङ्गच्छेत, परं जीवो निर्गुणः, अविद्यावरणेनैव त्रिगुणमय इव ।

(ख) **यदा जीव स्त्रिगुणमयः** स्यात् तदा ब्रह्मत्वासत्त्वसम्भवादब्रह्मत्वस्यापिब्रह्मत्वभावः इति पातञ्जलीयंमतं सम्भवेत् परं जीवो निर्गुणः अविद्यावरणेनैव त्रिगुणमय इव ।

(ग) **यदा जीव स्त्रिगुणमयः**स्यात्तदा तस्यैकविंशतिप्रकारकदुःखसद्भावसम्भवाद् गौतमीयमतमपि संगच्छेत, परं जीवो निर्गुणः-अविद्यावरणेनैव त्रिगुणमय इव ।

(घ) **यदा जीव स्त्रिगुणमयः**स्यात्तदा पुरुषस्य कर्तृत्वनानात्वसंभवाद् भेदवादिनां कापिलानामपि मतं सङ्गच्छेत, परं जीवो निर्गुणः- अविद्यावरणेनैव त्रिगुणमय इव ।

(ङ) **यदा जीव स्त्रिगुणमयः**स्यात्तदा कर्मफलभोगस्य वस्तुतः सम्भवा त्कर्मफलवादिनां जैमिनीयानां मतं सङ्गच्छेत, परं जीवो निर्गुणः- अविद्यावरणेनैव त्रिगुणमय इव ।

भावार्थ—सप्तपदार्थवादिनो नवीनतार्किका वैशेषिका यत्प्रागभावादुत्पत्तिं स्मरन्ति, अर्थादसत उत्पत्ति रिति मन्यन्ते-तच्छ्रुतितो युक्तितश्च विरुद्धमस्ति । अब्रह्मभूतोऽपि जीवः साधनबलादब्रह्म सम्पद्यत इति मत्वा पातञ्जला ब्रह्मत्वस्याप्युत्पत्तिरिति स्मरन्ति तच्च श्रुतितोयुक्तितश्च विरुद्धमस्ति। नैयायिकाश्च दुःखसत्यं वदन्तो ज्ञानाद् दुःखनाशं मन्यन्ते तदपि श्रुतियुक्तिभिर्विरुद्धमस्ति । भेदवादिनः सांख्याःपञ्चधाभेदं स्मरन्ति, तदपि श्रुतियुक्तिभिर्विरुद्धम् । मीमांसकाश्च कर्मफलसत्यत्वं वदन्ति तदपि विरुद्धमस्ति। यदि जीव स्त्रिगुणमयः स्यात्तर्हि चैतेषामपि मतानि सङ्गच्छेयुः-परं जीवो न त्रिगुणमयःकेवलमविद्यावरणेनैव त्रिगुणमय इव वर्तते। अतः सर्वे पूर्वोक्तमतवादा भ्रान्त्यैवोपदिशन्ति नतु तत्त्वदृष्ट्या । अतः इत्थं पञ्चमतप्रवर्तका अविद्यापिहितबुद्धय अन्धपरम्परान्यायेनोभयतः पतन्ति। अतः कुतर्कादि विहाय श्रुतियुक्तिसम्मतं षष्ठं वेदान्तमतमवलम्ब्य तन्निर्दिष्टः, अविद्यापरतर स्त्वमेव भगवान्समाश्रयणीयः।

तात्पर्यार्थ—विभिन्नपञ्चमतवादखण्डनमुखेन वेदान्तमतं द्रढयन्तिश्रुतयः ।

सरलार्थ—वैशेषिकहरू कार्यमात्रको उत्पत्तिमा कारण-प्रागभावलाई मानेर असत्‌बाट उत्पत्ति मान्दछन्। तर श्रुतिमा -**"सबभन्दा पहिले सत् थियो, त्यसैबाट क्रमशः जगत्‌को उत्पत्ति भयो"** भन्ने पाइएकोले श्रुतिमा विरोध पर्न जाने र साथै असत्‌बाट उत्पत्ति हुन नसक्ने भएकोले यो मत भ्रान्त छ-बालुवाबाट तेल कहिल्यै निस्कँदैन किनकि बालुवामा तैलभाव असत् छ, यसैले प्रागभावबाट कार्यको उत्पत्ति मान्ने वैशेषिकहरू भ्रान्त धारणाले उपदेश गर्दछन्।

यस्तै पतञ्जलिका चेलाहरू पनि जीवमा नभएको ब्रह्मत्वभाव योग साधनको बलद्वारा जीवमा उत्पन्न हुन्छ भन्ने मानेर असत्‌को उत्पत्ति हुने सम्झन्छन्–जस्तो असुवर्ण ताम्रादि जसरी रसायनादि प्रभावबाट सुवर्ण बन्दछ, त्यस्तैगरी अब्रह्म नै ब्रह्म हुन्छ भन्ने योगदर्शनका अनुयायीहरूको भनाइ छ–तर श्रुतिमा "आफूँ ब्रह्म नै भएर ब्रह्म हुन्छ" भनेर वास्तवमा अज्ञानरूपी आवरणको अपवारण गरेपछि ब्रह्मत्व अनुभव हुन्छ–अज्ञान उपाधिले गर्दा मात्र ब्रह्म भएर पनि ब्रह्म हूँ भन्ने हुन न सकेको भनी ब्रह्मकै ब्रह्मत्त्व प्राप्तिलाई स्पष्ट गरेकोले अब्रह्म जीव ब्रह्म हुन्छ भन्ने मान्दा विरोध पर्दछ । जस्तो घाँटीमा माला लगाएरै पनि कहिलेकाँही "माला हरायो" भनेर धूमधाम खोजी गरिन्छ, अर्कोले घाँटीमा नै माला देखाइ दिएपछि आँफूलाई मालाधारी सम्झन्छ–वास्तवमा ऊ पहिल्यै पनि मालाधारी नै थियो, विस्मृतिरूप आवरणले मात्र आँफूलाई मालाधारी संझेको थिएन, त्यस्तै अज्ञानोपाधिबाट भूलेको ब्रह्मभाव ज्ञानबाट प्राप्तहुन्छ भन्ने श्रुतिको तात्पर्य हुनाले अब्रह्म जीवको ब्रह्मभाव उत्पन्न हुन्छ भनेर मान्दा श्रुति विरोध हुन्छ। साथै अब्रह्म जीवको ब्रह्मत्व उत्पत्ति मान्दा ब्रह्मको नश्वरत्व हुन आउँछ तब त सम्पूर्ण श्रुति, स्मृति अनुभवहरू नै गलत हुन जान्छन्–यसैले योगदर्शन पनि भ्रान्त हुन आउँछ ।

गौतमवादी नैयायिकहरू दुःख सत्य छ, सत्य दुःख ज्ञानबाट नासिन्छ भन्दछन्– यिनीहरूको मत पनि भ्रान्त छ–किनभने "जो सत्य छ त्यसको नाश हुँदैन, जो नाश हुन्छ त्यो सत्य हुन सक्दैन भन्ने गीताको विरोध पर्न जाने र श्रुतिमा" मायाले मोहित भएर दुःखी बन्दछ" भनी दुःखलाई मायिक अर्थात् अज्ञानकल्पित असत् मानेको हुनाले सत्यनाशवादी नैयायिकहरूपनि भ्रान्त धारणाले उपदेश गर्दछन् भन्ने स्पष्ट हुन आउँछ। त्यसैले यो मत पनि भ्रान्त छ ।

सांख्यवादीहरू पुरुषबाहुल्य स्वीकार गरेर जीवजीवमा भेद, ब्रह्म जीवमा भेद, जडजीवमा भेद, ब्रह्मजडमा भेद, जड जडमा भेद भनी पाँच किसिमको भेद मान्दछन्। यी भेदवादीको पनि श्रुतिविरुद्ध मत छ –श्रुतिमा "सबै ब्रह्म हो" "यहाँ कुनै नाना छैन" "सबैमा यौटा देवता छ" आदि भनेको छ। भेदवाद मान्दा श्रुतिविरोध पर्न आउँछ। जस्तो आकाश यौटै भएपनि घटाकाश, मठाकाश आदि उपाधिकल्पित भेदभाव देखिन्छ–वास्तविक भेद हुदैन त्यस्तै आत्मा एक छ, उपाधिवशात् अनेक भएपनि वास्तविक भेद छैन। यस तथ्यबाट सांख्य मत पनि पूर्णतः भ्रान्त छ।

मीमांसकहरू कर्मजनित स्वर्गादिफललाई सत्य मानेर कर्मजड बन्दछन् । वास्तवमा **"पुण्य सकिएपछि मर्त्यलोकमा जन्मनुपर्छ" "पुण्यबाट कमिएको लोक नाश हुन्छ"** आदिश्रुतिस्मृतिद्वारा कर्मफल सत्य नदेखिएकोले यिनीहरू पनि भ्रान्त छन् ।

वास्तवमा जीव त्रिगुणमय भएको भए गुणपरिणामको अदृष्टद्वारा असत्को उत्पत्ति, गुणवान् जीवमा ब्रह्मभाव न हुँदा साधनबलद्वारा ब्रह्मत्व निष्पत्ति, गुणवान् जीवको दुःख सद्भाव, गुण परिणामरूप अदृष्टले नै जीवको नानात्व साध्य सिद्धि, गुणवान् जीवको वास्तविक कर्मफलभोग आदि उपर्युक्त वैशेषिक, पातञ्जल, गौतमीय, सांख्य, मीमांसकहरूको मत मिल्न आउँथ्यो । तर वास्तवमा जीव निर्गुण, निष्कल, एकमात्र हुनाले र जीव ब्रह्मभन्दा अतिरिक्त नभएको हुनाले यी पाँचै मतहरू अज्ञानबाट खडा भएका भ्रान्त हुन् । वेदान्तमत मात्र यथार्थ छ । यसै वेदान्तमतद्वारा तपाईं सुलभ हुनुहुन्छ ।

सुखदार्थ—भगवन् ! स्मरतोऽसतो जनिं यौ,
स्मरतो यौ सदभाव भेदभावौ ।
फलनित्यमवैति यश्च भाट्टः,
सकला भ्रान्तमता न साधुवादाः ॥१२॥

"पुमान् त्रिगुणवान् छ यो, अपर ब्रह्मभिन्नै" भनी,
पतञ्जलि, कणाद वा कपिल, गौतमी, जैमिनि ॥
विपक्षगण भन्दछन्- "गलत हो सबैको मत",
गुणी छ न त जीव यो, छ पर ब्रह्मभिन्नै न त ॥१२॥

॥१२॥

मूल श्लोक—

सदिव मन स्त्रिवृत्त्वयि विभात्यसदामनुजात्,
सदभिमृशन्त्यशेषमिदमात्मतयात्मविदः ॥
नहि विकृतिं त्यजन्ति कनकस्यतदात्मतया,
स्वकृतमनुप्रविष्टमात्मतयाऽवसितम् ॥१३॥

पदच्छेदार्थ—सत्, इव, मनः, त्रिवृत्, त्वयि, विभाति, असत्, आमनुजात्, सत्, अभिमृशन्ति, अशेषम्, इदम्, आत्मतया, आत्मविदः, नहि, विकृतिम्, त्यजन्ति, कनकस्य, तदात्मतया, स्वकृतम्, अनुप्रविष्टम्, इदम्, आत्मतया, अवसितम् ॥१३॥

अन्वयार्थ—आमनुजात्, त्रिवृत्, अशेषम्, इदम्, मनः, असत्, त्वयि, सत्, इव, विभाति, आत्मविदः, इदम्, अशेषम्, आत्मतया, सत्, अभिमृशन्ति, हि, कनकस्य, विकृतिम्, तदात्मतया, न, त्यजन्ति, स्वकृतं, इदम्, अनुप्रविष्टम्, आत्मतया, अवसितम् ।

पर्यायार्थ—आमनुजाज्जीवमभिव्याप्य त्रिवृत् त्रिभिर्वर्ततइति त्रिगुणात्मकं पञ्चीकृतमशेषं सम्पूर्णमिदं जगत्पुरोदृश्यमानं मनो मनः कल्पितं सदपि त्वयि भगवति भवति सदिव वास्तविक मिव विभाति प्रतीयते सर्वाधिष्ठानतयेत्यर्थः । मनोमात्रविलसितं सर्वं न वस्तुतः सदित्यर्थः । आत्मविदोज्ञानिनः पुरुषा इदं पुरोदृश्यमानमशेषं समग्रं जगदात्मतया परमात्मस्वरूपतया सत्सत्यमभिमृशन्ति स्मरन्ति। हि यतः कनकस्य सुवर्णस्य विकृतिं कटककुण्डलादिविकारं तदात्मतया कनकरूपतया न त्यजन्ति न जहति। कनकार्थिनो मानवाः सुवर्णविकृतकुण्डलादिकं सुवर्णमेव मत्वा गृह्वणन्तीत्यर्थः । स्वकृतं स्वसृष्ट मिद जगत्तत्राऽनुप्रविष्टमनुस्यूतंजीवरूपादिकमात्मतया परमात्मतयाऽवसितं निश्चितम् । आत्मकार्यत्वान्नात्मतः पृथगित्यर्थः ।

यथाचात्र श्रुतिस्मृत्यादयः-**"यस्मिन्निदं यतश्चेदं येनेदं यइदं स्वयम् । योऽस्मात्परस्माच्च पर स्तं प्रपद्ये स्वयंभुवम्-भागवत" "यच्चकिंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥ नारायणोपनिषद्" मैत्र्युपनिषदि च" सोऽमन्यत एतासां प्रतिबोधनायाभ्यन्तरं विविशामि स वायु रिवाऽऽत्मानं कृत्वाऽभ्यन्तरं प्राविशत्"** । बृहदारण्यके **"स एव इह प्रविष्ट आनखाग्रेभ्यो यथा क्षुरःक्षुरधानेऽहितःस्याद् विश्वम्भरो वा विश्वम्भर कुलाय तं न पश्यन्ति स यथा सैन्धवाखिल्य उदके प्रास्त उदकमेवानुविलीयेत न हास्योद्ग्रहणायेव स्यात्" "तदन्तरस्य सर्वस्य तदु सर्वस्यास्य वाह्यत :- ईशावास्योपनिषत्"** तैत्तिरीयोपनिषदि **"यदिदं किञ्च तत्सृष्ट्वा तदेवानुप्राविशत्"** । **"गीतायां ईश्वरः सर्वभूतानां हृद्देशेऽजुन तिष्ठति" "एष त आत्माऽन्तर्याम्यमृतः- बृहदारण्यके"** छान्दोग्यो पनिषदि **"स एव अधस्तात् स उपरिष्यत् स पश्चात् स**

पुरस्तात् स दक्षिणतः स उत्तरतः स एवेदं सर्वम्" "सत्ता चितिः सुख श्चेति स्वभावा ब्रह्मणस्त्रयः । मृच्छिलादिषु सत्तैव व्यज्यते नेतरद्वयम्" "अस्तिभाति प्रियं रूपं नामचेत्यंशपञ्चकम् । आद्यंत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ॥" "सर्वं खल्विदं ब्रह्म" । "आत्मत एवेदं सर्व मिति" "एकं बीजं बहुधा यः करोति" "संकल्पकल्पितत्त्वाच्च मनोरूपमसन्मयम् । असन्मयविनाशेतु कः शोको वद राघव "योग वाशिष्ठ" ।

भावार्थ—हे भगवन्! जीवमभिव्याप्य सर्वमिदं पञ्चीकृतं जगन्मनोविलसितमात्रम् । सदासतोभवतः सर्वस्याऽधिष्ठानत्वादसदपि सदिव प्रतिभाति । परमात्मविदः सर्वस्य जगत आत्मकार्यत्वादात्मरूपेणैव सर्वस्य सत्यत्वं मन्यन्ते-यथाहि लोकेऽपि सुवर्णार्थीजनः सुवर्णजनितं कटककुण्डलादिकं सुवर्णदृष्ट्या गृह्णाति, कुण्डलत्वान्नत्यजति । तथैव परमात्मकृतस्य जगतोऽपि परमात्मानुप्रविष्टत्वात्सत्यत्वेन जानन्त्यधिष्ठानसत्तया । अतोहि **"सर्वं खल्विदंब्रह्म"** इत्यस्माभिर्विनिश्चितमस्ति ।

तात्पर्यार्थ—ब्रह्मणः सर्वोपादानत्वेन सर्वस्मिन्ननुप्रविष्टत्वात् सर्वं खल्विदं ब्रह्मेति ।

सरलार्थ—भगवन् ! जीवदेखि लिएर त्रिगुणात्मक जति जगत् छ, सबै मनः कल्पित हो, यस कारण यो असत् भए पनि यसको आधार सत्यस्वरूप तपाईं नै हुनुभएकोले यो सत्य भैं प्रतीत भैरहेको छ। वस्तुतः असत् हो । ज्ञानी पुरुष यसलाई किन सत्य मान्दछन्- भने, यो जगत् सत्यस्वरूप भगवान्ले सत्यस्वरूप आफैमा आँफै अनुप्रविष्ट भएर रचना गरेको हुनाले आत्माको कार्य मानेर आत्मरूपबाट सत्य मान्दछन्, जस्तो लोकव्यवहारमा सुन खोज्ने मानिसले सुनमा बनेको ढुम्री, माडवारी पाउँदा यो सुन हैन भनेर नलिने गर्दैन अर्थात् त्यसलाई पनि सुवर्णरूपले नै ग्रहण गर्दछ, त्यस्तै ज्ञानी पुरुषहरू पनि परमात्मरचित जगत्लाई परमात्मस्वरूपले नै सत्य मान्दछन्। सत्ता परमात्माकै स्वरूप हो । यही कुरा हामीले निश्चित गरेका छौं।

सुखदार्थ—भगवन् ! त्रिगुणात्मकं जगद्यत्,
विविधत्वेन प्रतीयतेऽत्र सद्वद् ॥
कटके कनकत्वधीर्यथैवाऽ—
खिलमेतत्परमात्मरूपमेव ॥१३॥

असत् छ सब यो जगत् त्रिगुणवान्, मनः कल्पित,

तथापि सब सत्य भैं फगत हुन्छ है भासित ॥

अनात्म छ तथापि यो रचित सत्य आत्मा विषे,

अतः कनकबुद्धिले कटक सत्य भैं सत् हुने ॥१३॥

॥१३॥

मूल श्लोक–

तवपरि येचरन्त्यखिलसत्त्वनिकेततया,

त उतपदाऽऽक्रमन्त्यविगणय्य शिरोनिर्ऋतेः ॥

परिवयसे पशूनिव गिरा विबुधानपि ताँ

स्त्वयिकृतसौहृदाः खलुपुनन्ति न ये विमुखाः ॥१४॥

पदच्छेदार्थ–तव, परि, ये, चरन्ति, अखिलसत्त्वनिकेततया, त, उत, पदा, आक्रमन्ति, अविगणय्य, शिरः, निर्ऋतेः, परिवयसे, पशून्, इव, गिरा, विबुधान्, अपि, तान्, त्वयि, कृतसौहृदाः, खलु, पुनन्ति, न, ये, विमुखाः ॥१४॥

अन्वयार्थ–अखिलसत्त्वनिकेततया, ये, तव, परिचरन्ति, ते, उत, अविगणय्य, निर्ऋतेः, शिरः,पदा, आक्रमन्ति, ये, विमुखाः, तान्, विबुधान्, अपि, गिरा, पशून्, इव, परिवयसे, खलु, ये, त्वयि, कृतसौहृदाः, पुनन्ति, ये, विमुखाः, न ।

पर्यायार्थ–अखिल सत्त्वनिकेततयाऽखिलानि समग्राणि सत्त्वानि जीवनान्येव निकेतो निवासो यस्य तस्य भावस्तत्तातया सकलप्राणिनिवासतयेत्यर्थः। ये भक्तास्तव परिचरन्ति त्वां सेवन्ते त उत त एव भक्ता अविगणय्याऽनाहृत्य निर्ऋतेर्मृत्योः शिरो मूर्द्धानंपदा चरणेनाऽऽक्रमन्ति मर्दयन्ति मृत्युं जयन्तीत्यर्थः। ये जना विमुखा अभक्ता स्तान्तादृशान् विबुधानपि पण्डितानपि गिरा रज्जुरूपिण्यावेदवाचा पशूनिव पशुवत्परिवयसेत्वंबध्नासि । खलु निश्चितं ये जना त्वयि भगवति भवति कृतसौहृदा विहितस्नेहा : सन्ति ते पुनन्ति पवित्रयन्ति आत्मानमुद्धरन्तीत्यर्थः । ये जना विमुखा अभक्ता स्ते न पुनन्ति नचात्मानमुद्धरन्तीत्यर्थः ।

अत्रच श्रुतिस्मृत्यादयः–**"इहचेदवेदीदथ सत्यमस्ति नो चेदिहावेदीन्महती विनष्टिः"।**

"तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" "उध्दरेदात्मनात्मानं नात्मान मवसादयेत्" "अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखा त्प्रमुच्यते" "निबन्धनी रज्जुरेषा या ग्रामे वसतो रतिः। छित्त्वैतां सुकृतो यान्ति नैनां छिन्दन्ति दुष्कृतः"।

भावार्थ—हे भगवन्! ये जनाः सर्वत्र तव निवास इति बुद्ध्या त्वां सेवन्ते ते हि मृत्युं जयन्ति, ये च सर्वत्र भगवान् व्याप्त इति न मन्यन्ते ते खलु विशिष्टदार्शनिका अपि वेदगतविधिनिषेधरूपेण रज्जुना बध्यन्ते। भगवति भवति सम्पादितस्नेहा जना आत्मानं सर्वं च वासनामयात्संसारादुद्धरन्ति निश्चयम्। ये न तादृशा स्ते नात्मान मप्युद्धरन्ति, किमुत सर्वम्।

तात्पर्यार्थ—सर्वत्र भगवद्बुद्धिरेव मोक्षायेत्यर्थ : ।

सरलार्थ—हे भगवन्! तपाईं सर्वत्र हुनुहुन्छ भन्ने बुद्धिले जो मानिस तपाईंको सेवा गर्दछन्, त्यस्ता भक्तजनहरू नै मृत्युमस्तकमा अनादरपूर्वक पाइलो टेक्न सक्दछन् अर्थात् मृत्युलाई जित्दछन्। जो सर्वत्र भगवद् बुद्धि राख्दैनन् त्यस्ता मानिसहरू विशिष्ट दार्शनिक नै भए तापनि कर्तव्याकर्तव्य बताउने वेदवचनरूप दाम्लोले पशुहरू झैं तपाईंद्वारा बाँधिन्छन्। यसबाट यो निश्चित हुन्छ कि जो तपाईंमा प्रेम गर्छन् ती भक्तहरू यस वासनामय संसारबाट आँफू र अरूलाई पनि पवित्र पारेर उद्धार गर्दछन् –जो तपाईंमा प्रेम गर्दैन त्यस्ताले आँफैलाई पनि उद्धार गर्न सक्दैन खाडलमा हाल्दछ, अरूलाई त के उद्धार गरोस्।

सुखदार्थ—भगवन्! भवतो हि सत्तयैतद,

प्रतिभाति त्वयि सत्यधिष्ठितेवै ।
इतिवेदवचो विरोधयन्तः,
न हि ते कर्हि तदाप्नुवन्ति सन्तः ॥१४॥

समस्त जडजीवमा अनुप्रविष्ट आत्मा भनी,
बुझे जति सबै तरे कुलपवित्र पारे पनी ॥
प्रसिद्धमत वेदको विधिनिषद्ध बाटो लिने,
बुझक्कड फँसे यसै, जकडिए–"यसै हो हुने" ॥१४॥

॥१४॥

मूल श्लोक–

त्वमकरणः स्वराडखिलकारकशक्तिधरः

तव बलिमुद्वहन्ति समदन्त्यजयाऽनिमिषाः ॥

वर्षभुजोऽखिलक्षितिपतेरिव विश्वसृजो,

विदधति यत्र ये त्वधिकृता भवतश्चकिताः ॥१५॥

पदच्छेदार्थ–त्वम्, अकरणः स्वराट्, अखिलकारकशक्तिधरः, तव, बलिम्, उद्वहन्ति, समदन्ति, अजया, अनिमिषाः, वर्षभुजः, अखिलक्षितिपतेः, इव, विश्वसृजः, विदधति, यत्र, ये, तु, अधिकृताः, भवतः, चकिताः ॥१५॥

अन्वयार्थ–त्वम्, अकरणः, स्वराट्, अखिलकारकशक्तिधरः, अनिमिषाः, विश्वसृजः, तव, अजया, बलिम्, उद्वहन्ति, समदन्ति, यत्र, ये, अधिकृताः, भवतः, चकिताः, विदधति, अखिल क्षितिपतेः, वर्षभुजः, इव ।

पर्यायार्थ–हे भगवन्! त्वं भवानकरणो नास्ति करणानीतीन्द्रियसम्बन्धरहितोऽपि स्वराट् स्वेनैव राजतइति स्वयंप्रकाशोऽखिलकारकशक्तिधरोऽखिलानिसमग्राणि करणानीन्द्रियाणि तेषां शक्तिं क्षमतां धारयति दधातीति समस्तेन्द्रियशक्ति सञ्चालकोऽसीत्यर्थः । अतएवाऽनिमेषा निमेषरहिता देवा विश्वसृजो जगत्स्रष्टुस्तव तुभ्यमजया स्वस्वशक्त्या सह बलिं पूजोपहारादिकमुद्वहन्ति समर्पयन्ति । समदन्ति स्वयं च मनुष्यैर्दत्तं हव्यकव्यादिकं भक्षयन्ति च । यत्र यस्मिन्कर्मणि ये त्वयाऽधिकृता नियुक्ता स्ते तु भवत स्त्वत्तश्चकिता भीताः सन्तो विदधति स्वकर्तव्यं कुर्वन्ति । अखिलक्षितिपते श्चक्रवर्तिनो राज्ञो वर्षभुजो वार्षिकवेतनभोगिनः कर्मचारिणो वा खण्डमण्डलाधिपतय इव यथा यथाहि खण्डमण्डलपतयोऽखण्डमण्डलपतये बलिं समर्पयन्ति तदाज्ञां च परिपालयन्ति तथैव देवा इत्यर्थः ।

अत्रच श्रुतिस्मृत्यादयो यथा– कठोपनिषदि "भयादस्याग्निस्तपति भयात्तपति सूर्यः । भयादिन्द्रश्च मृत्युर्धावति पञ्चमः ॥" तैत्तिरीयो पनिषदि "भीषास्माद् वातः पवते भीषोदेति सूर्यः । भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः ॥" स्मृत्याम्– "यद्भयाद् वाति वातोऽपि सूर्यस्तपति यद्भयात् । वर्षन्ति तोयदाः काले पुष्यन्ति तरवोवने ॥" वेदे "एतस्य वाऽक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत एतस्यवाऽक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठत एतस्यवाऽक्षरस्य प्रशासने गार्गि निमिषा मुहूर्त्ता अहोरात्राणि मासा अर्धमासा ऋतवः संवत्सरा इति

विधृता स्तिष्ठन्ति, एतस्य वाऽक्षरस्य प्रशासने गार्गि प्राच्योऽन्याः स्यन्नद्यःस्यन्दन्ते श्वेतेभ्यः पर्वतेभ्यः प्रतीच्योऽन्या यां यां च दिशमन्वेतस्यवाऽक्षरस्य प्रशासने गार्गि ददतो मनुष्याः प्रशंसन्ति यजमानं देवा दर्वीं पितरोऽन्वायत्ताः" "स एष सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किञ्च" "य ईशेऽस्य द्विपदश्चतुष्पदः" "सर्वाधिपत्यं कुरुते महात्मा" "य ईशेऽस्य जगतो नित्यमेवा नान्यो हेतुर्विद्यत ईशनाय" "यदादित्यगतं तेजो जगद्भासयतेऽखिलम्। यच्चन्द्रमसि यच्चाग्नौ तत्तेजोविद्धि मामकम्॥" "अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स श्रुणोत्यकर्णः" "यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते" यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यन्ति" "अशब्द मस्पर्श मरूप मव्ययं तथाऽरसं नित्य मगन्धवच्च यत्" चक्षुषश्चक्षु रुत श्रोत्रस्य श्रोत्रम्" "आसीनो दूरं व्रजति शयानो याति सर्वतः" "तदेजति तन्नैजति तद्दूरे तद्वन्तिके"।

अत्र च- अखिलकारकशक्तिधर इत्यत्राऽखिलानां प्राणिनां कारकाणि तेषां शक्तिं धारयतीत्यपि भवितुं शक्यते। अथवाखिलानि तुच्छानि नेत्यखिलानि चिदानन्दमयस्वरूपभूतानि कारकाणि तेषां शक्तिं धारयति। स्वराट्-इत्यत्रापि स्वैःस्वाभाविकैः शक्तिज्ञानानन्दादिभिर्गुणै राजत इत्यपि भवति नेन्द्रियापेक्षेत्यर्थः। अजयाऽनिमिषा इत्यत्रापि चाऽजय ! सम्बोधनपरकोऽपि भवति ।

भावार्थ– हे भगवन् ! प्राकृतेन्द्रियरहितोऽपि भवान् पराख्यस्वरूपशक्तिमयेन्द्रियः सन् सर्वेषां स्थावरजङ्गमादीनां सञ्चालकोऽस्ति। अतएव इन्द्रादयोऽपि देवाः स्वस्वशक्त्या भवन्तं पूजयन्ति नैवेद्यं चोपहरन्ति। एवं त्वया यस्मिन् कर्मणि ये नियुक्ता स्तत्कर्म ते नियोक्तु र्भवतो भीताः सन्तः सम्यक् पालयन्ति । स्वयंच मनुष्यदत्तं हव्यकव्यादिकं भुञ्जते ते । यथाहि खण्डमण्डलपतयो राजानोऽखण्डमण्डलपतये महाराजाय करं समर्पयन्ति तदाज्ञां च पालयन्ति ।

तात्पर्यार्थ—सर्वं खलु भगवदधीनम्, देवानामपि देवत्वाद् भगवान् महादेवः सर्वेश्वर इति ।

सरलार्थ—हे भगवन् ! तपाईं प्राकृतेन्द्रियरहित भएर पनि अनीन्द्रिय हुनुहुन्न, तपाईंमा स्वाभाविक अप्राकृत इन्द्रियहरू छन्। यिनै स्वाभाविक अप्राकृत इन्द्रियद्वारा स्वयं प्रकाश वा स्वाभाविक शक्तिमान् तपाईं सम्पूर्ण विश्वको संचालक हुनुहुन्छ । यस कारण इन्द्रादि सबै देवताहरू आ आफ्नो तपाईंले दिएको शक्ति अनुसार तपाईंलाई पूजा गर्दछन्, उपहार चढाउँछन् र आफूँ पनि मनुष्यदत्त हव्यकव्य खान्छन्, जुन जुन काममा तपाईंले जसजसलाई खटाउनु भएको छ, तपाईंबाट डराएर ती ती

त्यो त्यो काम गर्दछन् पनि। जसरी सानातिना राजारजौटाहरू महाराजाधिराजलाई नजराना टक्र्याउँछन्, आज्ञापालन गर्दछन् अथवा कर्मचारीहरू जुन–जुन काममा जो जो खटाइएका छन्, सरकारको डरले त्यो त्यो काम ती ती कर्मचारी ठीक ठीक समयमा गर्दछन्, त्यस्तै सम्पूर्ण चराचर जगत् नै तपाईंको निर्देशन र नियमनअनुसार चलेको छ। यसैले तपाईं महादेव परमेश्वर हुनुहुन्छ ।

यहाँनेर परमात्मस्वरूपको सम्बन्धमा केही चर्चा गर्नु प्रासङ्गिक होला । परमात्माको सम्बन्धमा श्रुतिहरूमा पनि विभिन्न रूपले वर्णन गरेको पाइन्छ, यसैले परमात्मा कस्तो छ भनेर छुट्याउन बडो गाहारो पर्छ। श्रुतिमा बताइएको विभिन्नतामा समता अनेकतामा एकता अनन्वयतामा समन्वयता राख्न न सक्नाले नै विभिन्न मतवाद खडा भएका छन् । यतिमात्र हैन, मूर्खहरूको लागि श्रुतिमा वर्णित द्विभाव तथा परस्पर विपरीतभावले गर्दा परमात्मस्वरूप उपहासास्पदसमेत भै रहेको छ । श्वेताश्वतर उपनिषद्मा **"अपाणिदोपादो जवनो ग्रहीता पश्यत्यचक्षुःसशृणोत्यकर्णः"** अर्थात् परमात्मा हात खुट्टा नभएको भए तापनि छीटो दौडन्छ, ग्रहण गर्छ, आँखा नभएको भए तापनि देख्छ, कान नभएको भए तापनि सुन्दछ इत्यादि भनेको छ । यस्तैगरी विभिन्न ठाउँमा विरोधाभास देखिन्छ, यसैले साधारण मानिसहरू परमात्मस्वरूपको सम्बन्धमा अलमलिनु अस्वाभाविक पनि छैन। त्यसैले **"त्व मकरणःस्वराडखिलकारकशक्तिधरः"** यस वेदस्तुतिको प्रसङ्गमा यस सम्बन्धी वास्तविकता उपस्थापित गर्न चाहन्छु ।

सच्चिदानन्दमय परमात्मा स्वरूपतः सदा एकभावमा विराजमान भए तापनि माया सम्बन्धले गर्दा तीनभावमा प्रतीयमान हुन्छ । अध्यात्मभावमा ब्रह्म, अधिदैवभावमा ईश्वर, अधिभूतभावमा विराट् । यी तीन भाव र तद्वत् स्वरूपलाई लिएर श्रुति आदि शास्त्रहरूमा वर्णन गरेको छ। यसैले परमात्मस्वरूपको सम्बन्धमा विभिन्न किसिमका विपरीतभावका वाक्यहरू तथा द्वयर्थमूलक वाक्यहरू पाइन्छन्। गीतामा भगवान्ले भन्नुभएको छ–**"अक्षरं ब्रह्म परमं स्वभावोऽध्यात्म मुच्यते । अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम्"** अर्थात् अक्षर परब्रह्मको माया सम्पर्करहित जो भाव हो, त्यो अध्यात्म हो, क्षर संज्ञक प्रकृति विलासमय जो भाव हो, त्यो अधिभूत हो, जो पुरुषसंज्ञक नियन्तृभाव हो, त्यो अधिदैव भाव हो, यी तीन भाव र तद्गत स्वरूप बुझ्नेपछि श्रुतिको विभिन्नतामा समता, अनेकतामा एकता, अनन्वयतामा समन्वयता हुन्छ।

(क) अध्यात्म भाव—ब्रह्मको यस भावलाई श्रुतिहरूमा "तत्" पदद्वारा शब्दित भएको छ, ब्रह्मको जो सच्चिदानन्दमयी सत्ता छ, त्यो त्रिगुणतरङ्गमयी मायाभन्दा पर छ, यसैमा मायाको पनि लय हुन्छ, जीवको मुक्ति पनि यसैमा हुन्छ । व्यक्त तथा अव्यक्त मायाको चिर सम्पर्क विहीन, निर्गुण, निरञ्जन, निष्कल, स्वराट्, पर ब्रह्मको सत्ता अध्यात्म भाव हो । यसभावलाई यद्यपि श्रुतिले तत्पदगम्यको रूपले बताएकोछ, यो भाव शब्दातीत, अनिर्देश्य, निर्गुण, अनिर्वचनीय हुनाले यसभावको वर्णन गर्दै जाँदा श्रुतिले पनि **"नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा" "न विद्मो न विजानीमः"** भन्नु परेको छ। यस मायातीत अध्यात्मभाव कुनै विशेषणद्वारा विशेषित तथा शब्दद्वारा शब्दित खास हुन न सक्ने हुनाले श्रुतिमा **"नेति नेति"** शब्दद्वारा परिचय गराइएको छ । वृहदारण्यको पनिषद्मा **"अथात आदेशो नेति नेति नह्येतस्मादन्यत्परमस्ति"** अर्थात् परब्रह्मको परिचयको निमित्त यतिमात्र बताउन सकिन्छ कि त्यो, यो हैन, यो हैन, यसभन्दा अतिरिक्त अरू केही पनि छैन। यसरी यसभावको वर्णन सकारात्मक रूपले हैन, नकारात्मक रूपले गरिएको छ। यस निर्गुण ब्रह्मको वर्णन **"नञ्"** को प्रयोगद्वारा नपुंसकलिङ्गमा गरिएको छ। जस्तै–

बृहदारण्यकमा–**"तदेतद् ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्"** कठोपनिषद्मा **"अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्य मगन्धवच्चयत्"** बृहदारण्यकमा **"स एष नेति नेत्यात्माऽग्राह्यो न हि गृह्यतेऽशीर्यो नहि शीर्यतेऽसङ्गो नहि सज्जतेऽसितो नहि व्यथते"** माण्डूक्योपनिषद्मा **"नान्तः प्रज्ञं न बहिः प्रज्ञं नोभयतः प्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञं अदृष्ट मव्यवहार्य मग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यम्"** कठोपनिषद्मा **"अन्यत्र धर्मा दन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् । अन्यत्र भूताच्च भव्याच्च" "अन्यदेव तद्विदितादथोऽविदितादधि"** मुण्डकोपनिषद्मा **"यत्तदद्रेश्यमग्राह्यमगोत्र मचक्षुः श्रोत्रं तदपाणिपादम्"** ईशावास्योपनिषद्मा **"सपर्यगाच्छुक्रमकाय मव्रणमस्नाविरं शुद्ध मपापविद्धम्"** ।

यसै अध्यात्मभावलाई प्रकृतिविलासरहित हुनाले निर्विशेष ब्रह्मभाव वा निर्गुण ब्रह्मभाव पनि भनिन्छ । श्रुतिस्मृतिहरूमा जे जति **"नञ्"** संयुक्त नपुंसकलिङ्गी पदको प्रयोग भएको छ, त्यसबाट मायासम्पर्करहित, नित्यशुद्धबुद्धमुक्त, निर्विशेष, निर्गुण, निरञ्जन, निष्कल, परब्रह्म, परमेश्वरको भाव सम्झनु पर्छ । परमात्माको यही निर्विशेष अशब्द, निर्गुणभाव बुझेर त परीक्षित महाराजले **"ब्रह्मन् ! ब्रह्मण्यनिर्देश्ये निर्गुणे गुणवृत्तयः । कथं चरन्ति श्रुतयः साक्षात्**

सदसतः परे" भनेर प्रश्नगरेका हुन् । र शुकजीले भन्न न सकिने त्यस निर्विशेष, निर्विग्रह, ब्रह्मलाई **"बुद्धीन्द्रियमनःप्राणाञ्जनानामसृजत् प्रभुः। मात्रार्थं च भवार्थंच आत्मनेऽकल्पनाय च"** भनेर **"कहाँ जान्छौ?"** भन्ने प्रश्नको **"खीर खाएँ"** भन्ने जवाफ जस्तो रूपमा सगुणको साक्षात् प्रतिपादन गरेर निर्गुण ब्रह्मको तात्पर्यवृत्तिले प्रतिपादन गर्दछन् भन्नुपरेको हो ।

(ख) अधिदैव भाव–परमात्माको विकाररहित दृष्टिसृष्टितिर आकृष्ट भएर अर्धाङ्गिनी जगज्जननी महामाया शबलित सविशेष, सगुण भाव अधिदैव भाव हो, यही परमात्माको **"स"** शब्दद्वारा संज्ञित सगुण ब्रह्म नै ईश्वर भाव हो । यो भाव अन्तःकरण अथवा ज्ञानको अवलंबनद्वारा जान्न सकिनेगरी श्रुतिमा बताएको छ । जस्तै–

कठोपनिषद्मा **"पराञ्चि खानि व्यतृणत्स्वयंभू स्तस्मान्पराक्पश्यति नान्तरात्मन् । कश्चिद् धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्त्वमिच्छन् ।" "एषोऽणुरात्मा चेतसावेदितव्यः" ज्ञानप्रसादेन विशुद्धसत्व स्ततस्तु तं पश्यते निष्कलं ध्यायमानः "हृदा मनीषा मनसाभिक्लृप्ता य एतद्विदु रमृतास्तेभवन्ति" "एष सर्वेषु भूतेषु, गूढात्मा न प्रकाशते ॥ दृश्यते त्वग्र्ययाबुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥"** इत्यादि श्रुतिहरूले सविशेष सगुण ब्रह्म ईश्वर ज्ञानगम्य बताएको छ । यद्यपि यो भाव र अध्यात्म भावमा वस्तुतः कुनै फरक छैन तापनि भावराज्यमा प्रशस्त फरक छ । किनभने यसै भावको अधिष्ठानद्वारा महामाया प्रकृति चेतनवती बनेर अनादि अनन्त सृष्टिधाराको विस्तार गरिरहेकी छे। यसै भावलाई श्रुतिमा यसरी बताएको छ–**"पादोऽस्य विश्वाभूतानि त्रिपादस्याऽमृतं दिवि"** अर्थात् परमात्माको एकै पाउमा समस्त विश्व छ, बाँकी तीन पाद सृष्टिभन्दा अतीत और अमृत छन् । **"त्रिष्वेकपाच्चरेद्ब्रह्म त्रिपाच्चरति चोत्तरे। सत्यानृतोपभोगार्थो द्वैतीभावो महात्मनः" "विष्टभ्याह मिदं कृत्स्नमेकांशेन स्थितोजगत्" "यस्तूर्णनाभ इव तन्तुभिः प्रधानजैः स्वभावतो देव एकः स्वमावृणोत्–श्वेताश्वतर" "नारायणे भगवति तदिदं विश्वमाहितम्। गृहीतमायोरुगुणः सर्गादावगुणः स्वतः–भागवत" "तच्छक्त्युपाधिसंयोगाद् ब्रह्मैवेश्वरतां ब्रजेत् – विष्णुपुराण"** ।

अध्यात्मभाव र अधिदैव भावको फरक यही देखियो–कि यौटै ब्रह्म महासमुद्रको दुई अवस्था । निर्वात निष्काम शान्तिमय अवस्था र सवात, अनन्ततरङ्गमय वीचिविक्षुब्ध अवस्था। यौटै ब्रह्म मायायवनिकाको आवरणद्वारा सगुण सङ्कुचित र मायाशून्य भएर निर्गुण व्यापक भइरहेको छ ।

यी दुवै भावलाई श्रुतिहरूमा एकै ऋचामा देखाइएको छ । बृहदारण्यकोपनिषद्मा **"द्वे वाव ब्रह्मणोरूपे मूर्तं चैवाऽमूर्तंच । मर्त्यंचामृतंच । स्थितं च यत् च । सत्च त्यत्च ।"** मैत्रायणी उपनिषद्मा **"द्वे वाव खल्वेते ब्रह्म ज्योतिषो रूपके"** शङ्कराचार्यले भन्नु भएको छ-**"सन्त्युभयलिङ्गाः । अस्थूलमनण्वह्रस्वमदीर्घ इत्येवमाद्याश्च निर्विशेषलिङ्गाः"** वास्तवमा यी दुई भावमा वस्तुतः फरक छैन तापनि यौटा निर्विशेष हुनाले साक्षात् बताउन न सकिने र अर्को विशेषणद्वारा विशेषित गरेर बताउन सकिने यतिमात्र फरक देखिएको छ। श्रुतिमा निर्विशेष ब्रह्मभावलाई क्लीवलिङ्ग र सविशेष ब्रह्मभावलाई पुल्लिङ्गद्वारा यौटै ऋचामा पनि फरक गरी देखाएको छ । मुण्डकोपनिषद्मा **"यत्तदद्रेश्यमग्राह्यमगोचरमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं तद्भूतयोनिं परिपश्यन्ति धीराः"** यसमन्त्रमा अद्रेश्य अग्राह्य देखि अपाणिपादसम्म **"नञ्"** प्रयोगगरेर नपुंसक लिङ्गद्वारा निर्विशेष ब्रह्मबोधकता देखाएको छ बाँकी पुंलिङ्गद्वारा सविशेष ब्रह्मबोधकता देखाएको छ । यी दुईभावलाई यसरी देखाइएको छ-**"लीलया वापि युञ्जेरन् निर्गुणस्य गुणाःक्रियाः सर्वं त्वमेव सगुणो विगुणश्च भूमन् वदन्ति तत् तत्त्वविद स्तत्त्वं यज्ज्ञानमद्वयम् । ब्रह्मेति परमात्मेति भगवानिति शब्द्यते । सदक्षरं ब्रह्म य ईश्वरः पुमान्, गुणोर्म्मिसृष्टिस्थितिकालसंलयः"** इत्यादि ।

यही सगुण ब्रह्म ईश्वर विश्वको सृष्टि स्थिति प्रलयकर्ता मानिएको छ । ब्रह्मसूत्रमा भनेको छ **"जन्माद्यस्य यतः"** । यही ईश्वरको अनन्तशक्ति तीन भागमा विभक्त भएर सृष्टि, स्थिति, प्रलय हुन्छ । भागवतमा भनेको छ **"आत्ममायां समाविश्य सोऽहं गुणमयीं द्विज! सृजन् रक्षन् हरन् विश्वं दध्रे संज्ञां क्रियोचिताम्" "भक्तचित्तसमासीनो ब्रह्मविष्णुशिवात्मकः"** ।

यही सगुणब्रह्म ईश्वर नै अधिदैव भाव हो ।

(ग) आधिभौतिक भावः–परमात्माको अधिभूतस्वरूप अनन्तकोटीब्रह्माण्डमय कार्य ब्रह्म हो । कारणब्रह्म र कार्यब्रह्ममा भिन्नता न हुनाले कारण ब्रह्म परमात्मामा जो मायाद्वारा कार्यब्रह्मको नित्यस्थिति विद्यमान छ, यही विराट्रूप परमात्माको आधिभौतिक भावहो । श्रुतिहरूमा यसभावको प्रशस्त वर्णन पाइन्छ । जस्तैः- छान्दोग्योपनिषद्मा **"स एव अधस्ता त्स उपरिष्ट्या त्स पश्चात्सपुरस्ता त्स दक्षिणतः स उत्तरत : स एवेदं सर्वम्" "सर्वं खल्विदं ब्रह्म"** मुण्डकोपनिषद्मा **"अग्निर्मूर्धा**

चक्षुषी चन्द्रसूर्यौ दिशःश्रोत्रे वाग् विवृताश्चवेदाः । वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा" श्वेताश्वतर "सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः । सर्वव्यापी स भगवान् तस्मात् सर्वगतः शिवः ॥" गीता "अनेक बाहूदरवक्त्रनेत्रं पश्यामित्वां सर्वतोऽनन्तरूपम् । नान्तं न मध्यं न पुन स्तवादिं पश्यामि विश्वेश्वर ! विश्वरूपम्" स्मृतिमा "द्यां मूर्द्धानं यस्य विप्रा वदन्ति खं वै नाभिश्चन्द्रसूर्यौ च नेत्रे ॥ दिशःश्रोत्रं विद्धिपादौ क्षितिश्च सोऽचिन्त्यात्मा सर्वभूतप्रणेता" "ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्य उरू तदस्य यद्वैश्यः पद्भ्यांशूद्रोऽजायत" "विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहु रुतसंविश्वतस्पात् । सं बाहुभ्यांधमति संपतत्रै द्यावाभूमी जनयन्देव एकः" "सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्" इत्यादि ।

यस्तै प्रकारले परमात्माको आध्यात्मिक, आधिदैविक र आधिभौतिक त्रिविध भाव रूप वेदादि शास्त्र सम्मत हो। यी भावहरूको ज्ञानदृष्टिद्वारा सम्यक् अवलोकन गरेको खण्डमा मुमुक्षु साधकले कुनै किसिमको वखेडामा उल्झनु पर्दैन । समस्तवेद वाक्यहरूको सम्मति यही नै हो।

परमात्माको अध्यात्मभाव तात्पर्यवृत्तिबाट मात्र जान्न सकिने हुनाले यी दुई अधिदैव अधिभूतभावद्वारा परात्मज्ञान गराउने उद्देश्य देखिन्छ । जस्तो सूर्यमा किरणप्रदानशक्ति भएर पनि कुनै वस्तुमा प्रतिफलित भएन भने प्रकाश वा प्रभाव देखिन सकिंदैन । त्यस्तै परमात्मामा भएको सत्, चित्, आनन्दमयभाव मायारूपी आधार या उपाधिमा न परी व्यक्त हुन सक्दैन । यसैको निमित्त अधिदैव र अधिभूतभाव तटस्थ लक्षणवेद्य हुन्। यही हो परमात्माको स्वरूप ।

परमात्माको स्वरूपको सम्बन्धमा भगवान् शङ्कराचार्यले भन्नुभएको छ – **"सर्वकार्यधर्मविलक्षणे ब्रह्मणि"** अर्थात् ब्रह्म समस्त कार्य र धर्मबाट विलक्षण स्वरूप छ । ब्रह्म विषय पनि हैन, विषयी पनि हैन, ब्रह्म ज्ञाता, ज्ञान, ज्ञेय केही पनि हैन, द्रष्टा, दर्शन दृश्य कुनै पनि हैन, स्थूल पनि हैन, सूक्ष्म पनि हैन, अणु पनि हैन, महान् पनि हैन, सत् पनि हैन, असत् पनि हैन, चित् पनि हैन, जड पनि हैन, सुख पनि हैन, दुःख पनि हैन । त ब्रह्म के हो त ? ब्रह्म केही पनि हैन, सवकुछ हो । ब्रह्ममा समस्त विरुद्धधर्म तथा समस्तद्वन्द्व को चिरसमन्वय छ । देश, काल, निमित्त यी उपाधिकारणहरू जसमा लवलीन छन् । ब्रह्ममा द्वैत पनि छैन, अद्वैत पनि छैन, ब्रह्म जात पनि हैन, अजात पनि हैन, क्षुब्ध पनि छैन, प्रशान्त

पनि छैन । ब्रह्ममा समस्तद्वन्द्व र समस्तद्वैतको ऐकान्तिक अवसान र आत्यन्तिक लय छ । यही भाव स्पष्ट गर्न वशिष्ठले योगवाशिष्ठमा भन्नुभएको छ-

किमाकाश मनाकाशं न किंचित् किंचिदेवकिम् ।
कःसर्वं न च किंचिच्च कोऽहंनाहं च किं भवेत् ?
गच्छन्नगच्छति च कःकोऽतिष्ठन्नपि तिष्ठति ।
कश्चेतनोऽपि पाषाणः कश्चिद्व्योम्नि विचित्रकृत् ?
केनाप्यणुकमात्रेणपूरिताशतयोजनी ।
कस्याणोरुदरे सन्ति किलावनिभृतां धराः ?
अचन्द्रार्काग्नितारोऽपिकोऽविनाशप्रकाशकः ।
अनेत्रलभ्यात्कस्माच्च प्रकाशः संप्रवर्तते ?
कोऽणुस्तमः प्रकाशः स्यात् कोणुरस्तिच नास्ति च ।
कोऽणुदूरेप्यदूरेच कोणुरेव महागिरिः ?
निमेष एव कः कल्पः कः कल्पोऽपि निमेषकः ।
किं प्रत्यक्ष मसद्रागं किं चेतनमचेतनम् ?
आत्मानं दर्शनं दृश्यं को भासयति दृश्यवत् ।
कटकादि न हेम्नेव विकीर्णं केन च त्रयम् ?
दिक्कालादनवच्छिन्नादेकस्मादसतः सतः ।
द्वैतमप्यपृथक् तस्माद् द्रवतेव महाम्भसः ॥

यसप्रकार निर्गुण ब्रह्म सत्तामा अखिल द्वैत तथा द्वन्द्वमूलक सत्ताको अपूर्व समन्वय र विलय वर्णन गरेर वशिष्ठ भन्नु हुन्छ–

"ज्ञाता ज्ञानं तथा ज्ञेयं द्रष्ट्य दर्शन दृश्यभूः ।
कर्ता हेतुः क्रिया यस्मा त्तस्मै ज्ञप्त्यात्मने नमः ॥"

यही हो परमात्म स्वरूप- यसभन्दा बढी भन्न सकिंदैन । प्रस्तुत वेदस्तुतिको श्लोकमा पनि परमात्मस्वरूपको अध्यात्मभावको इङ्गितगरेर अधिदैव भावको चित्रण गरेको छ ।

यी सब भावमा संयम गरेर विचार गर्ने होभने ईश्वरसत्तामा दुई अपूर्वभाव पाइन्छन् । ऐश्वर्य र माधुर्य । ऐश्वर्यभावमा पापीको लागि दण्डता, जगत्को नियन्ता, सज्जनको परित्राता, धर्मको प्रतिष्ठाता, सृष्टिस्थिति प्रलयको कर्ता, अदृष्टको विधाता, सर्वशक्तिमान्, सर्वज्ञ, सर्वव्यापी देखिन्छन् । माधुर्यभावमा दयामय,

स्नेहमय, करुणामय, प्रेममय भक्तवत्सल देखिन्छन् । यी दुवै भावको पूर्ण विकाश भगवान्कै पूर्णावतार श्रीकृष्णको जीवनमा मात्र भएको थियो ।

यही हो परमात्म स्वरूप ।

सुखदार्थ–भगवन् ! जनता यथैव राज्ञः,

तव चाज्ञां परिपालयन्ति देवाः ॥

प्रकृतेन्द्रियभावशून्यकोऽपि,

ह्यसि नैसर्गिकसर्वशक्तिमाँस्त्वम् ॥१५॥

तिमी करण शून्य छौ परम ! भाव अध्यात्ममा,

तथापि अधिदैवमा अखिलशक्तिमान् कार्यमा ।

अभिज्ञ, सव विश्वको नियमले नियन्ता हुँदै,

प्रशासन चलाउने भुवनको महाराज भैँ ॥१५॥

॥१५॥

मूल श्लोक–

स्थिरचरजातयः स्युरजयोत्थनिमित्तयुजो,

विहरउदीक्षयायदिपरस्यविमुक्ततत: ॥

नहि परमस्य कश्चिदपरो न परश्च भवेद्,

वियतइवापदस्य तव शून्यतुलां दधत : ॥१६॥

पदच्छेदार्थ–स्थिरचरजातयः, स्युः, अजया, उत्थनिमित्तयुजः, विहरः, उदीक्षया, यदि, परस्य, विमुक्त, ततः, नहि, परम्, अस्य, कश्चित्, अपरः, न, परः, च, भवेत्, वियतः, इव, अपदस्य, तव, शून्यतुलाम्, दधतः ॥१६॥

अन्वयार्थ–विमुक्त, यदि, ततःपरस्य, अजया, विहरः, उदीक्षया, उत्थनिमित्तयुजः, स्थिरचरजातयः, स्युः, हि, वियतः, इव, अपदस्य, परमस्य, शून्यतुलाम्, दधतः, तव, क़श्चित्, अपरः, न, परः, च, न, भवेत् ।

पर्यायार्थ–विमुक्त ! हे मायातीत भगवन् ! ततोमायातः परस्याऽतीतस्य तव यदि सृष्टिपूर्वकालेऽजया मायया सह विहरो विहारो भवति तर्ह्युदीक्षयोद्गतकटाक्षेण वोद्भूतसर्गविषयसङ्कल्पेनोत्थनिमित्तयुज उत्थै र्निमित्तै र्युज्यन्त इति–

उत्थितप्रारब्धवच्छरीराः स्थिरचरजातयः स्थावरजङ्गमविशेषाः स्यु र्भवेयुः । हि यतो वियत आकाशस्येव यथाऽपदस्य वैषम्यनैर्घृण्यानास्पदस्य परमस्य परा दूरे मा माया यस्य वा परा सर्वोत्कृष्टा मा शक्तिर्यस्य सर्वोत्कृष्टस्य शून्यतुलां निरुपमां दधतो निरुपमस्येत्यर्थः। तव भवतः परमात्मनोऽपर आत्मीयो न नहि परोऽनात्मीयश्च न नहि भवेत्।

यद्वाऽपदस्य निरालम्बनस्य वियत इव सर्वसमानस्येत्यर्थः अथवाऽपदस्येयत्ताज्ञानाविषयस्य शून्यतुलामाकाशोपमां दधतः सर्वव्यापकस्येत्यर्थ। किंवाऽपदस्यातिसूक्ष्मस्येत्यर्थः।

अत्र च श्रुतिस्मृत्यादयः– गीतायाम् "मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् । हेतुनानेन कौन्तेय जगद्विपरिवर्तते ॥" "दैवी ह्येषा गुणमयी मम माया दुरत्यया" । श्रुतिः "यतः प्रसूता जगतः प्रसूती तोयेन जीवान् व्यससर्ज भूम्याम्" मनुसंहिता– "द्विधाकृत्वात्मनो देहमर्द्धेन पुरुषोऽभवत् । अर्द्धेन नारी तस्यां स विराजमसृजत्प्रभुः ॥" श्रीमद्भागवते– "त्वं देवशक्त्यां गुणकर्मयोनौ, रेतस्त्वजायां कविरादधेऽजः" देवीभागवते– "योगेनात्मा सृष्टिविधौ द्विधारूपो बभूव सः । पुमाँश्च दक्षिणार्द्धाङ्गोवामार्द्धा प्रकृतिः स्मृता ॥ सा च ब्रह्मस्वरूपा च नित्या सा च सनातनी । यथात्मा च तथा शक्ति र्यथाग्नौ दाहिका स्थिता ॥" "मन्मायाशक्तिसंक्लृप्तं जगत् सर्वं चराचरम् । सापि मत्तः पृथङ् माया नास्त्येव परमार्थतः ॥" "शक्तिशक्तिमतोर्भेदं वदन्ति परमार्थतः । अभेदं चानुपश्यन्ति योगिन स्तत्त्वचिन्तकाः"–विष्णुपुराणे "न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्चदृश्यते । परास्यशक्तिर्विविधैवश्रूयते स्वाभविकी ज्ञानबलक्रिया च ॥ मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्। तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥ श्वेताश्वतरोपरिषदि" विष्णुपुराणे– "प्रकृति र्या मयाख्याता व्यक्ताव्यक्तस्वरूपिणी। पुरुषश्चाप्युभा वेतौ लीयेते परमात्मनि ॥" "नारायणे भगवति तदिदं विश्वमाहितम् । गृहीतमायोरुगुणः सर्गादावगुणःस्वतः ॥" विष्णुपुराणे– "तच्छत्तंयुपाधिसंयोगाद् ब्रह्मैयवेश्वरतांब्रजेत्। आत्ममायां समाविश्य सोऽहं गुणमयीं द्विज! । सृजन्रक्षत् हरन् विश्वं दध्रे संज्ञांक्रियोचिताम्" "भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया– गीता" । श्वेताश्वतरे–"य एकोऽवर्णो बहुधाशक्तियोगाद वर्णाननेकान् निहितार्थोदधाति" देवीभागवते– "जडाऽहं तस्य सान्निध्यात्प्रभवामि सचेतना । अयस्कान्तस्य सान्निध्यादयसश्चेतनायथा॥" "कवि र्मनीषी परिभूःस्वयम्भू र्याथातथ्यतोर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः–ईशावास्योपनिषदि" ।

भावार्थ—हे भगवन् ! मायातीतोऽपि भवान् यदि सर्गविषयकसङ्कल्पेन मायया तवैव बहिरङ्गशक्त्या सह विहारं करोति, तर्हि तदोद्भूतस्वस्वप्रारब्धकर्मजदेहवन्तो नानाविधाश्चराचरजीवा उद्भवेयुः। यथाहि दूरं दूरतरं दूरतमं वाऽल्पमल्पतरमल्पतमं चोड्डीयमानं खगसमूहं प्रति निरालम्बनत्वादिना गगनस्य न परापरत्वं भवति तथैव स्वस्वप्रारब्धानुसारेणोत्कर्षापकर्षत्वाद् भवतः कृते न कोऽपि परोवाऽपरोभवति । यतो हि भवान् वैषम्याऽनास्पदः।

तात्पर्यार्थ—सृष्टौ भवतः कारणत्वेऽपि सृष्टिगतोत्कर्षापकर्षयो र्न कारणमिति ।

सरलार्थ—हे भगवन्! तपाईं मायातीत भएर पनि सृष्टिविषयक संकल्प लिएर जब आफ्नै शक्ति मायासित विहार गर्नुहुन्छ, त्यसै बेला उद्भूत निमित्त अनुसार नाना प्रकारका स्थावर जङ्गम जीव उत्पन्न हुन्छन् । तपाईं आकाश समान सर्वत्र सम हुनाले यस सृष्टिमा तपाईंको आफ्नो वा अर्को कोही छैन। यसैले तपाईं प्रति कुनै किसिमको वैषम्य र नैर्घृण्य दोष रहदैन। आकाशमा आ आफ्नो बल अनुसार उड्ने चराहरू प्रति जस्तो आकाश सम रहन्छ त्यस्तै तपाईं सम हुनुहुन्छ।

यहाँनेर ईश्वरको सृष्टि विषयमा कस्तो भूमिका रहन्छ, यो कुरा बुझ्नु आवश्यक छ।

वेदान्त प्रतिपाद्य निर्गुण ब्रह्म मायाबाट अतीत छ, यस निमित्त विना मायाको सम्बन्धले सृष्टि स्थिति पालनादि कार्य हुन सक्दैन। यसकारण मायाशंबलित, मायोपाधिक, सगुण ब्रह्म, ईश्वरबाट मात्र जगत्को सृष्टि हुन्छ। जुन मायाको प्रभावले अद्वितीय परमात्मामा निखिल प्रपञ्चको विस्तार हुन्छ–त त्यो माया परमात्मा भन्दा पृथक् वस्तु हो वा हैन। पृथक् वस्तु हो भने ब्रह्म र माया द्वैत भयो, पृथक् हैन भने–माया केहो त भन्ने पनि प्रश्न हुन सक्छ। वेदान्त दर्शनअनुसार माया मिथ्या र सान्त हुनाले र मायाको विलय पनि परब्रह्म परमात्मामा नै हुने हुनाले यसको पृथग् अस्तित्व छैन । यसैले द्वैत छैन। माया परमात्माको पराशक्ति हो । जसरि आगो र आगोको दाहिकाशक्तिमा फरक छैन, त्यस्तै परमात्माको शक्ति हुनाले माया पनि फरक हैन । "परमात्माको कुनै कार्य या करण छैन, तर परमात्मा समान वा बढी कोही पनि छैन। उनको पराशक्ति अनेकधा विस्तृत भएको छ । परमात्माकै स्वाभाविकी ज्ञानशक्ति निःश्वास रूपबाट निक्लेर अनन्त ज्ञानभण्डाररूपी वेद प्रकट हुन्छ। स्वाभाविकीबल शक्ति अनन्त प्राणरूपद्वारा

उत्थितप्रारब्धवच्छरीराः स्थिरचरजातयः स्थावरजङ्गमविशेषाः स्यु र्भवेयुः । हि यतो वियत आकाशस्येव यथाऽपदस्य वैषम्यनैर्घृण्यानास्पदस्य परमस्य परा दूरे मा माया यस्य वा परा सर्वोत्कृष्टा मा शक्तिर्यस्य सर्वोत्कृष्टस्य शून्यतुलां निरुपमां दधतो निरुपमस्येत्यर्थः । तव भवतः परमात्मनोऽपर आत्मीयो न नहि परोऽनात्मीयश्च न नहि भवेत् ।

यद्वाऽपदस्य निरालम्बनस्य वियत इव सर्वसमानस्येत्यर्थः अथवाऽपदस्येयत्ताज्ञानाविषयस्य शून्यतुलामाकाशोपमां दधतः सर्वव्यापकस्येत्यर्थ । किंवाऽपदस्यातिसूक्ष्मस्येत्यर्थः ।

अत्र च श्रुतिस्मृत्यादयः- गीतायाम् **"मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् । हेतुनानेन कौन्तेय जगद्विपरिवर्तते ॥" "दैवी ह्येषा गुणमयी मम माया दुरत्यया"** । श्रुतिः **"यतः प्रसूता जगतः प्रसूती तोयेन जीवान् व्यससर्ज भूम्याम्"** मनुसंहिता- **"द्विधाकृत्वात्मनो देहमर्द्धेन पुरुषोऽभवत् । अर्द्धेन नारी तस्यां स विराजमसृजत्प्रभुः ॥"** श्रीमद्भागवते- **"त्वं देवशक्त्यां गुणकर्मयोनौ, रेतस्त्वजायां कविरादधेऽजः"** देवीभागवते- **"योगेनात्मा सृष्टिविधौ द्विधारूपो बभूव सः । पुमांश्च दक्षिणार्द्धाङ्गोवामार्द्धा प्रकृतिः स्मृता ॥ सा च ब्रह्मस्वरूपा च नित्या सा च सनातनी । यथात्मा च तथा शक्ति र्यथाग्नौ दाहिका स्थिता ॥" "मन्मायाशक्तिसंक्लृप्तं जगत् सर्वं चराचरम् । सापि मत्तः पृथङ् माया नास्त्येव परमार्थतः ॥" "शक्तिशक्तिमतोर्भेदं वदन्ति परमार्थतः । अभेदं चानुपश्यन्ति योगिन स्तत्त्वचिन्तकाः"**-विष्णुपुराणे **"न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्चदृश्यते । परास्यशक्तिर्विविधैवश्रूयते स्वाभविकी ज्ञानबलक्रिया च ॥ मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् । तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥ श्वेताश्वतरोपरिषदि"** विष्णुपुराणे- **"प्रकृति र्या मयाख्याता व्यक्ताव्यक्तस्वरूपिणी । पुरुषश्चाप्युभा वेतौ लीयेते परमात्मनि ॥" "नारायणे भगवति तदिदं विश्वमाहितम् । गृहीतमायोरुगुणः सर्गादावगुणःस्वतः ॥"** विष्णुपुराणे- **"तच्छत्तंयुपाधिसंयोगाद् ब्रह्मैयवेश्वरतांव्रजेत् । आत्ममायां समाविश्य सोऽहं गुणमयीं द्विज! । सृजन्रक्षत् हरन् विश्वं दध्रे संज्ञांक्रियोचिताम्" "भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया- गीता"** । श्वेताश्वतरे-**"य एकोऽवर्णो बहुधाशक्तियोगाद् वर्णाननेकान् निहितार्थोदधाति"** देवीभागवते- **"जडाऽहं तस्य सान्निध्यात्प्रभवामि सचेतना । अयस्कान्तस्य सान्निध्यादयसश्चेतनायथा ॥" "कवि र्मनीषी परिभूःस्वयम्भू र्याथातथ्यतोर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः-ईशावास्योपनिषदि"** ।

भावार्थ—हे भगवन् ! मायातीतोऽपि भवान् यदि सर्गविषयकसङ्कल्पेन मायया तवैव बहिरङ्गशक्त्या सह विहारं करोति, तर्हि तदोद्भूतस्वस्वप्रारब्धकर्मजदेहवन्तो नानाविधाश्चराचरजीवा उद्भवेयुः। यथाहि दूरं दूरतरं दूरतमं वाऽल्पमल्पतरमल्पतमं चोड्डीयमानं खगसमूहं प्रति निरालम्बनत्वादिना गगनस्य न परापरत्वं भवति तथैव स्वस्वप्रारब्धानुसारेणोत्कर्षापकर्षत्वाद् भवतः कृते न कोऽपि परोवाऽपरोभवति । यतो हि भवान् वैषम्याऽनास्पदः।

तात्पर्यार्थ—सृष्टौ भवतः कारणत्वेऽपि सृष्टिगतोत्कर्षापकर्षयो र्न कारणमिति ।

सरलार्थ—हे भगवन्! तपाईं मायातीत भएर पनि सृष्टिविषयक संकल्प लिएर जब आफ्नै शक्ति मायासित विहार गर्नुहुन्छ, त्यसै बेला उद्भूत निमित्त अनुसार नाना प्रकारका स्थावर जङ्गम जीव उत्पन्न हुन्छन् । तपाईं आकाश समान सर्वत्र सम हुनाले यस सृष्टिमा तपाईंको आफ्नो वा अर्को कोही छैन। यसैले तपाईं प्रति कुनै किसिमको वैषम्य र नैर्घृण्य दोष रहदैन। आकाशमा आ आफ्नो बल अनुसार उड्ने चराहरू प्रति जस्तो आकाश सम रहन्छ त्यस्तै तपाईं सम हुनुहुन्छ।

यहाँनेर ईश्वरको सृष्टि विषयमा कस्तो भूमिका रहन्छ, यो कुरा बुझ्नु आवश्यक छ।

वेदान्त प्रतिपाद्य निर्गुण ब्रह्म मायाबाट अतीत छ, यस निमित्त विना मायाको सम्बन्धले सृष्टि स्थिति पालनादि कार्य हुन सक्दैन। यसकारण मायाशंबलित, मायोपाधिक, सगुण ब्रह्म, ईश्वरबाट मात्र जगत्को सृष्टि हुन्छ। जुन मायाको प्रभावले अद्वितीय परमात्मामा निखिल प्रपञ्चको विस्तार हुन्छ–त त्यो माया परमात्मा भन्दा पृथक् वस्तु हो वा हैन। पृथक् वस्तु हो भने ब्रह्म र माया द्वैत भयो, पृथक् हैन भने–माया केहो त भन्ने पनि प्रश्न हुन सक्छ। वेदान्त दर्शनअनुसार माया मिथ्या र सान्त हुनाले र मायाको विलय पनि परब्रह्म परमात्मामा नै हुने हुनाले यसको पृथग् अस्तित्व छैन । यसैले द्वैत छैन। माया परमात्माको पराशक्ति हो । जसरि आगो र आगोको दाहिकाशक्तिमा फरक छैन, त्यस्तै परमात्माको शक्ति हुनाले माया पनि फरक हैन । "परमात्माको कुनै कार्य या करण छैन, तर परमात्मा समान वा बढी कोही पनि छैन। उनको पराशक्ति अनेकधा विस्तृत भएको छ । परमात्माकै स्वाभाविकी ज्ञानशक्ति निःश्वास रूपबाट निक्लेर अनन्त ज्ञानभण्डाररूपी वेद प्रकट हुन्छ। स्वाभाविकीबल शक्ति अनन्त प्राणरूपद्वारा

जगज्जीवहरूको जीवनीशक्तिलाई नियमित विधान गर्दछ। उनकै क्रियाशक्ति अनादिकाल देखि अनन्तकाल पर्यन्त जगच्चक्रलाई अविराम वेगले घुमाइ रहन्छ" । परमात्मा नित्य, निरञ्जन, निर्विकार भए तापनि प्रकृतिमाता माया नै परमात्माका स्वाभाविक शक्तिहरूलाई आफ्नो विविध विलासमयी, त्रिगुणतरङ्गमयी स्पन्दनधर्मिणी सत्ताद्वारा प्रकट गरी रहन्छ। यहीकुरा उपर्युक्त श्रुतिहरूमा उल्लेख भएको छ । **"न तस्य कार्यं करणं च विद्यते- इत्यादि"** । यसैकारण मायालाई प्रकृति र महेश्वरलाई मायाको अधिष्ठाता मायी भनेको छ। यसरी परमात्माकै शक्तिको रूपमा माया मानिएको छ ।

यसरी परमात्मसत्ता स्वरूपतः सर्वातीत भएर पनि मायाद्वारा सर्वतोव्याप्त, सृष्टिस्थिति प्रलयकारण र सम्पूर्ण विश्वको एकमात्र निदान मानिएको छ ।

वस्तुतः मायाको पृथक् सत्ता अस्वीकृत हुनाले दृश्यमान सम्पूर्ण जगत् प्रकृतिको परिणाम हैन, ब्रह्मको विवर्त हो अर्थात् डोरीमा सर्पभ्रमभैँ मोहिनी मायाको प्रतापद्वारा ब्रह्ममा नै जगद्भ्रान्ति भै रहेको छ। वास्तवमा दृश्यमान संसार ब्रह्म नै हो । यही नै वेदान्त सिद्धान्त हो ।

यस दर्शनअनुसार ईश्वर नै समस्तजगत्को कर्ता हो- किनकि ईश्वर नै जगत्को उपादान कारण पनि हो । किनभने जगत्को सत्ता वस्तुतः छैन, ब्रह्म सत्तामात्र छ । जस्तो ढुम्री, माडवारी जस्ता सुनका गहनाहरूमा वास्तविक भेद छैन, केवल नामरूपको मात्र भेद छ, वास्तवमा सबै सुन नै हुन्- त्यस्तै जगत् विविध नामरूप वैचित्र्यपूर्ण भए तापनि वास्तवमा ब्रह्म नै हो यसैले निमित्त तथा उपादान कारण दुवै ब्रह्म नै हो।

यसरी निर्गुण ब्रह्मभन्दा स्वरूपतः अभिन्न मायोपाधिक सगुण ब्रह्म ईश्वरलाई जगत् कारण मान्दा यो शङ्का हुनसक्छ कि चेतन ईश्वरबाट अचेतन जगत्को उत्पत्ति कसरी हुनसक्छ यसको समाधानमा चेतन पुरुषबाट नखरोमको उत्पत्ति भएजस्तै चेतन ईश्वरबाट अचेतन जगत्को उत्पत्ति हुनसक्छ भनिएको छ । अर्को शङ्का यो हुन्छ कि कुमालेले घैंटो बनाउँदा दण्ड, चक्र आदिको सहायता लिन्छ र घट निर्माण हुन्छ, ईश्वरको त कुनै उपकरण छैन कसरी जगत् निर्माण गर्दछ ? यसको समाधानमा ब्रह्मसूत्रमा भनिएको छ- जसरी दूध कुनै उपकरण नभैकन पनि दही बन्दछ त्यस्तै ईश्वर पनि जगत् सृष्टि उपकरणविना नै गर्दछ। अर्को शङ्का- ईश्वर आप्तकाम छ त उसलाई सृष्टिको के प्रयोजन छ ? ब्रह्मसूत्रमा भनिएको छ-

"लोकवत्तु लीलाकैवल्यम्" जस्तो बालक विनाप्रयोजन नै क्रीडा गर्दछ, त्यस्तै भगवान्को सृष्टि लीला विलास मात्र हो, भगवान्को अधिष्ठानताबाट प्रकृतिद्वारा स्वतः सृष्टि हुन्छ त्यसो भए संसार वैषम्यमय छ–कोही सुखी, कोही दुःखी, कोही धनी, कोही गरीब देखिँदा भगवान् बडो पक्षपाती या निष्ठुर रहेछन् भन्ने अर्को शङ्कामा ब्रह्मसूत्रमा भनिएको छ–

"फलमत उपपत्तेः" "कृतप्रयत्नापेक्षस्तु विहितप्रतिसिद्धा वैयर्थ्यादिभ्यः" "वैषम्य नैर्घृण्ये न, सापेक्षत्वा त्तथाहि दर्शयति" अर्थात्– ईश्वर कर्मफलका दाता हुन्, परन्तु कर्मको वैचित्र्य अनुसार नै फल दिन्छन्– नत्र त शास्त्रीय विधिनिषेध निरर्थक हुन्छ । ईश्वर, जीवकृत कर्मानुसार नै भिन्न भिन्न सृष्टि गर्दछन्, जसको पूर्व सुकृत छ, त्यसलाई सुखी, धनी, जसको पूर्व दुष्कृत छ त्यसलाई दुःखी बनाउँछन्– यही कुरा ईशावास्योपनिषद्मा पनि भनेको छ–**"याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः"** यही भावलाई लिएर प्रस्तुत श्लोकमा **"उत्थनिमित्तयुजः"** भनेको छ। यसैले ईश्वरमा कुनै किसिमको पक्षपात वा निष्ठुरता छैन । शङ्कराचार्य भन्नुहुन्छ–सृष्टिको विषयमा ईश्वर मेघ जस्तै हो। जौ, गहुँ, धान्य आदि मेघकै जलबाट फल्दछन्–यसनिमित्त मेघ साधारण कारण हो । परन्तु ब्रीहि, यवादि जो प्रत्येकमा प्रकृतिवैषम्य छ, त्यसको निमित्त मेघ कारण हुँदैन, अपितु बीजगत असाधारण सामर्थ्य नै कारण हुन्छ। ठीक त्यस्तै देव मनुष्यादि सृष्टिको विषयमा ईश्वर साधारण कारण हो, परन्तु उनीहरू प्रत्येकको पृथक् पृथक् कर्म नै असाधारण कारण हो। यसकारण सृष्टिविषयमा ईश्वर पर्जन्यवत् साधारण कारण हुनाले ईश्वरमा पक्षपात वा निष्ठुरताको कलङ्क लगाउन सकिँदैन ।

अर्को शङ्का–यदि कर्मानुसार नै ईश्वर फल प्राप्त गराउँछन् भने त ईश्वरमा ऐश्वर्य नहुनाले ईश्वर नै कसरी मान्ने ? जो कर्मको अधीन छ, त्यो सर्वशक्तिमान् तथा स्वतन्त्र कसरी हुनसक्छ ? यसमा यस्तो उत्तर गरिन्छ – दाह्य वस्तुको अभावमा आगोले पोल्दैन भन्दैमा आगोमा दाहिका शक्ति नै छैन भन्नु मूर्खतामात्र हुन्छ । दाहिका शक्ति हुनाले नै आगो दाह्यवस्तुलाई डढाउन सक्छ, पानी डढाउन सक्दैन – दाहिका शक्ति छैन। यस्तै ईश्वरमा अनन्तशक्ति हुनाले नै कर्मानुसार फल दिन्छन्, कर्मनियामक ईश्वरमा सर्वशक्तिमत्व नहुँदो हो त जड कर्मबाट फल मिल्ने सम्भवै रहँदैन । जीवकृत कर्मको अपेक्षा राख्दैमा ईश्वरमा सर्वशक्तिमत्ताको अभाव शङ्का गर्नु बीलकूलै सुहाउँदैन । जनताको काम व्यवहार अनुसार सरकार दण्ड वा पुरस्कार दिन्छ त के सरकारमा शक्ति या स्वतन्त्रताको अभाव भन्न

सकिन्छ र ? त्यस्तै हो । यसैले न्याय दर्शनमा भनेकोछ–**"ईश्वरः कारणम् पुरुषकर्माफल्यदर्शनात्"** । यी सब विभिन्न शङ्का उपशङ्काको समाधानद्वारा ईश्वर नै जगत्को कारण हो भन्ने कुरा स्पष्ट गरिएको छ।

